CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चौखम्भा राजसेवा ग्रन्थमाला

१

अथ

शुक्लयजुर्वेदीयरुद्राष्टाध्यायी

सम्पादकः

आचार्य ऋषिशंकर अग्निहोत्री

चौखम्भा ओरियन्टालिया

वाराणसी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशकः

चौखम्भा ओरियन्टालिया

पो० बाक्स नं० १०३२

गोकुल भवन, के० ३७/१०९, गोपाल मंदिर लेन

गोलघर, मैदागिन

वाराणसी - २२१००१ (उ०प्र०) (भारत)

E-mail: co@chaukhambha.com•info.covns@gmail.com

टेलीफोन:०५४२-२३३३४७६,२३३४३५६, टेलीफैक्स:०५४२-२३३४३५६

© चौखम्भा ओरियन्टालिया

पुनर्मुद्रित संस्करण : २०१९

मूल्य : ₹ १५-००

मुद्रक : चारू प्रिन्टर्स, गोलघर, वाराणसी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CHAUKHAMBHA RAJSEVA GRANTHAMALA

NO. 1

ATHA

ŚUKLAYAJURVEDĪYARUDRĀṢṬĀDHYĀYĪ

Edited By

ĀCHĀRYA RISISHANKAR AGNIHOTRI

CHAUKHAMBHA ORIENTALIA

VARANASI DELHI

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Publishers :

CHAUKHAMBHA ORIENTALIA
A House of Oriental and Antiquarian Books
Post Box No. 1032
Gokul Bhawan K. 37/109, Gopal Mandir Lane
Varanasi-221001 (India)
Telephone : 333476 Telegram : Gokulotsav

Branch—Bungalow Road, 9 U. B. Jawahar Nagar
(Near Karorimal College)
DELHI-110007 Telephone : 2911617, 238790

***Printers*—Srigokul Mudranalaya, Gopal Mandir Lane, Varanasi**

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

शुक्लयजुर्वेदीयरुद्राष्टाध्यायी

सर्वप्रथमं दीपं प्रज्वलय्य, आचम्य, गणेशाय पुष्पाञ्जलिं दत्त्वा अर्घं स्थापयेत् । ततः प्राणानायम्य देशकालौ संकीर्त्य पूजासंकल्पं कुर्यात् । तद्यथा—ॐ विष्णुः० ३ नमः परमात्मने श्री ब्रह्मपुराणपुरुषोत्तमाय तत्सदद्य पृथिव्यां जम्बूद्वीपे भरतखण्डे आर्यावर्ते अमुकक्षेत्रे ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे कलियुगस्य प्रथमचरणे विक्रमशके बौद्धावतारे अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रः अमुकराशिः अमुकोऽहं मम आत्मनः (यजमानस्य वा)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्रुतिस्मृतिपुराणोक्तफलावाप्तये सर्वापच्छान्तिपूर्वक-सर्वाभीष्टफलप्राप्त्यर्थं श्रीसाम्बसदाशिवप्रीतये सकृद्रुद्रावर्तनेन रुद्रैकादशिन्या वा भगवतः शिवस्य पूजनपूर्वकं जलधारया दुग्धधारया वा अभिषेकं करिष्ये। तदङ्गतया शरीर-शुद्धयर्थं षडङ्गन्यासांश्च करिष्ये।

अथ षडङ्गन्यासाः

ॐ मनो जूतिरितिमन्त्रस्य बृहस्पतिर्ऋषिः बृहतीच्छन्दः बृहस्पति-र्देवता हृदयन्यासे विनियोगः।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं य्यज्ञꣳसमिमन्दधातु। विश्वेदेवासऽइहमादयन्तामोँ३॥ प्रतिष्ठ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ हृदयाय नमः ॥ १ ॥ ॐ अयोद्ध्यग्निरितिमन्त्रस्य वुधगविष्ठिरा ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता शिरोन्यासे विनियोगः ॥ ॐ अयो॑द्ध्यग्नि॒स्समि॑धाजनाना॒म्प्रति॑धेनु॒मिवा॑यतीमु॒षास॑म् । यह्वाऽइ॑व॒प्रवा॒मुजि॑हाना॒श्चभ्रा॑नव॑ः सिस्रते॒नाक॒मच्छ॑ ॥ ॐ शिरसे स्वाहा ॥ २ ॥ ॐ मूर्द्धानमितिमन्त्रस्य भरद्वाजऋषिः त्रिष्टुप्छन्दः अग्निर्देवता शिखान्यासे विनियोगः ॥ ॐ मू॒र्द्धान॑न्दि॒वोऽअ॑र॒तिम्पृ॑थि॒व्याव्वै॑श्वा॒नरमृ॑तऽआजा॒तम॒ग्निम् । क॒विꣳ स॒म्राज॒मति॑थि॒ञ्जना॑ना॒मास॒न्नापात्रा॑ञ्जनयन्तदे॒वाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ ॐ मर्म्माणिते इति मन्त्रस्य अप्रतिरथ ऋषिः विराट्छन्दः मर्म्माणिदेवता कवचन्यासे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनियोगः ॥ ॐ मर्म्मा॑णि ते॒ वर्म्मणा॒च्छाद॒याम्य॒सो॑म॒स्त्वारा॑जा॒मृते॒ना-
नु॑ वस्ताम् ॥ उ॒रोर्व॑री॒यो व॒रु॒णस्ते॑ कृणोतु॒ जय॑न्त॒न्त्वानु॑ दे॒वा म॑दन्तु ॥
ॐ कवचाय हुम् ॥ ४ ॥ ॐ विश्वतश्च॒क्षुरिति मन्त्रस्य
विश्वकर्माभौवन ऋषिः त्रिष्टुप्छन्दः विश्वकर्मा देवता नेत्रन्यासे
विनियोगः ॥ ॐ वि॒श्वत॑श्च॒क्षुरु॒त वि॒श्वतो॑मुखो वि॒श्वतो॑बाहु॒रु-
त वि॒श्वत॑स्पात् ॥ सम्बा॒हुभ्या॒न्धम॑ति॒ सम्पत॑त्रै॒र्द्यावा॒भूमी॑ ज॒नय॑-
न्दे॒व ए॑क॑ः ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ मानस्तोके इति
मन्त्रस्य परमेष्ठी ऋषिः जगतीच्छन्दः एकरुद्रो देवता अस्त्रन्यासे
विनियोगः ॥ ॐ मा॑न॑स्तो॒के त॑न॒ये मा॒न॒ आयु॑षि मा॒नो॒गोषु॑ मा॒नो॒ अश्वे॑-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरीरिषः ॥ मानोव्वीरान्त्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवा-
महे ॥ ॐ अस्त्राय फट् ॥ ६ ॥

अथ ध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

एवम् आवाहनादिनीराजनान्तं सम्पूज्य जलदुग्धादिधारया वक्ष्य-
माणमन्त्रैः अभिषेकं कुर्यात् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ प्रथमाऽध्यायः

॥ श्रीगणेशाय नमः ॥ हरिः ॐ ॥ गणानांत्वागणपतिꣳ हवा महेप्रियाणांत्वाप्रियपतिꣳहवामहेनिधीनान्त्वांनिधिपतिꣳहवामहेव-सोमम । आहमंजानिगर्भधमात्वमंजासिगर्भधम् ॥ १ ॥ गायत्री-त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह । बृहत्युष्णिहाककुप्सूचीभिः शम्म्यन्तुत्वा ॥ २ ॥ द्विपदाश्चतुष्पदास्त्रिपदाश्चषट्पदाः ॥ छन्दाःसूचीभिः शम्म्यन्तुत्वा ॥ ३ ॥ सहस्तोमाः सहच्छन्दसऽआवृतः सहप्रमाऽऋषयःसप्तदैव्याः । पूर्वेषांपन्थामनु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्रुय धीरा ऽअन्वालेभिरेरत्थ्यो नरश्मीन् ॥ ४ ॥ यज्जाग्रतो दूरमुदै-
ति दैवन्तदु सुप्तस्य तथैवैति । दूरङ्गमज्योतिषाञ्ज्योतिरेकन्तन्मे मन ÷
शिवसङ्कल्पमस्तु ॥ ५ ॥ येनकर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति
विदथेषु धीरा ÷ । यदपूर्व्वं यक्षमन्तः प्रजानान्तन्मे मन ÷ शिवसङ्कल्प-
मस्तु ॥ ६ ॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु ॥
यस्मान्न ऽऋते किञ्चनकर्म्म क्रियते तन्मे मन ÷ शिवसङ्कल्पमस्तु ॥७॥
येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्व्वम् ॥ येन यज्ञस्ता-
यते सप्तहोतातन्मे मन ÷ शिवसङ्कल्पमस्तु ॥८॥ यस्मिन्नृचः साम-
यजूꣳषि यस्मिन्प्रतिष्ठितारथनाभाविवाराः । यस्मिँश्चित्तꣳसर्व्व-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मोतम्प्रजानान्तन्नमेमनऽशिवसङ्कल्पमस्तु ॥ ९ ॥ सुषारथिरश्वानिव-
यन्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठँयदजिरञ्च-
विष्ठन्तन्नमेमनऽशिवसङ्कल्पमस्तु ॥ १० ॥

इति रुद्रे प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः

हरिः ॐ ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंग-
सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदग्-सर्व्वम्यद्-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ह्रुतँस्वध्वभाज्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥
एतावानस्यमहिमातोज्ज्यायाँश्च पूरुषः ॥ पादोऽस्यविश्वाभुतानित्रि-
पादस्यामृतन्दिवि ॥३॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ।
ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोविराड-
जायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमि-
मथोपुरः ॥ ५ ॥ तस्मादूयज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्यम् ॥
पशूँस्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्च ये ॥ ६ ॥ तस्मादू-
यज्ञात्सर्व्वहुतऽऋचःसामानिजज्ञिरे । छन्दाꣳसिजज्ञिरेतस्मादूय-
जुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वाऽअजायन्तयेकेचोभया-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दंतꣳ ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ तँय्य-
ज्ञय्यबर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः ॥ तेनदेवाऽअयजन्तसा-
द्ध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्म-
णोऽस्यमुखमासीद्बाहूराजन्यः कृतः ॥ ऊरूतदस्यद्वैश्यः पद्भ्या-
ꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोꣳसूर्य्योऽ
अजायत । श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥
नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दि-
शꣳश्रोत्रात्तथालोकाँ २ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेमहविषा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवाश्चमतन्वत ॥ ऋक्सन्तोऽस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानः सचन्तयत्रपूर्वेसाध्याः सन्तिदेवाः ॥ १६ ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्चविश्वकर्म्मणः समवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेति तन्मर्त्यस्यदेवत्वमाजानमग्रे ॥ १७ ॥ वेदाहमेतम्पुरुषम्महान्त मादित्यवर्णन्तमसः परस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यः पन्थाविद्यतेऽयनाय ॥ १८ ॥ प्रजापतिश्चरतिगर्भेऽअन्तरजायमानो-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुधाव्विजायते ॥ तस्यᳬयोनिम्परिपश्श्यन्तिधीरास्तस्मिन्नहतस्थु-
र्भुवनानिविश्वा ॥ १९ ॥ योदेवेभ्यऽआतपतियोदेवानाम्पुरो-
हितः ॥ पूर्व्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥ रुच-
ब्राह्मञ्जनयन्तोदेवाऽअग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोव्विद्यात्त-
स्यदेवाऽअᳬसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे
पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण-
सर्व्वलोकम्मऽइषाण ॥ २२ ॥

इति रुद्रे द्वितीयोऽध्यायः ॥ २ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ तृतीयोऽध्यायः

हरिः ॐ ॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनो निमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः ॥ १ ॥ सङ्क्रन्देनानिमिषेणजिष्णुना युत्कारेण दुश्च्यवनेनधृष्णुना ॥ तदिन्द्रेणजयतातꣳसहध्वꣳ युधो नरऽइषुहस्तेनवृष्णा ॥ २ ॥ सऽइषुहस्तैꣳसनिषङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रो गणेन ॥ सꣳसृष्टजित्सोमपावाबाहुशर्द्ध्युग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ२॥ ऽअपबाधमानः ॥ प्रभञ्जन्त्सेनाः प्रमृणोयुधाजयन्नस्माकमेध्यवितारथानाम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाम् ॥ ४ ॥ बलविज्ञायस्थविरः प्रवीरः सहस्वान्वाजीसहमानऽ-
उग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित्
॥ ५ ॥ गोत्रभिदङ्गोविदंवज्रबाहुञ्जयन्तमज्मंप्रमृणन्तमोजसा ॥
इमꣳसजाताऽअनुवीरयध्वमिन्द्रꣳसखायोऽअनुसꣳरभध्वम् ॥६॥
अभिगोत्राणिसहसागाहमानोदयोव्वीरःशतमन्युरिन्द्रः ॥ दुश्च्य-
वनःपृतनाषाडयुद्ध्योस्माकꣳसेनाऽअवतुप्रयुत्सु ॥ ७ ॥ इन्द्रऽ-
आसान्नेताबृहस्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः ॥ देवसेनानामभि-
भञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम् ॥ ८ ॥ इन्द्रस्यव्वृष्णोव-
व्वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽउग्रम् ॥ महामनसा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

म्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्त्थात् ॥ ९ ॥ उद्धर्ष्यमघ-
वन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳसि ॥ उद्वृत्रहन्वाजिनां-
वाजिनान्युद्रथानाञ्जयताँऽअन्तुघोषाः ॥ १० ॥ अस्माकमिन्द्रꣳस-
मृतेषुध्वजेष्वस्माकंम्याऽइषवस्ताजयन्तु ॥ अस्माकंवीराऽउत्त-
रेभवन्त्वस्माँ२ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चित्तम्प्रति-
लोभयन्तीगृहाणाङ्गान्यप्वेपरेहि ॥ अभिप्रेहिनिर्दहहृत्सुशोकैरन्धे-
नामित्रास्तमसासचन्ताम् ॥ १२ ॥ अवसृष्टापरापतशरव्येव्रह्मसं-
शिते ॥ गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनाच्छिषः ॥ १३ ॥
प्रेताजयतानरऽइन्द्रोवꣳशर्म्मयच्छतु ॥ उग्रावः सन्तुबाहवोनाधृष्या-

CC-0. Agamnigam Digitized by eGangotri Foundation, Chandigarh.

यथासंथ ॥ १४ ॥ असौयासेनामरुतः परेषामभ्यैतिनऽओजसा-
स्पर्द्धमाना ॥ ताङ्गूहततमसापव्व्रतेनयथामीऽअन्योऽअन्यन्न-
जानन् ॥ १५ ॥ यत्रबाणाःसम्पतन्तिकुमाराविशिखाऽइव ॥ तत्र-
ऽइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु ॥ १६ ॥
मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व-
रीयावरुणस्तेकृणातुजयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥

इति रुद्रे तृतीयोऽध्यायः ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ चतुर्थोऽध्यायः

हरिः ॐ ॥ व्विब्भ्राड्बृहत्पिबतुसोम्यम्मद्ध्वायुर्द्दधद्यज्ञपा-
तावविंहुतम् ॥ द्यातंजूतोवोऽअभिरक्षतित्मनाप्प्रजाःपुपोष पुरुधा-
व्विराजति ॥ १ ॥ उदुत्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशोव्वि-
श्वायसूर्य्यम् ॥ २ ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ऽअनु ॥
त्वंव्वरुणपश्यसि ॥ ३ ॥ दैव्यावद्ध्वर्य्युऽआगतद्रथेनसूर्य्य-
त्वचा ॥ मद्ध्वायज्ञꣳसमञ्जाथे ॥ तम्प्रत्क्थाऽयंव्वेनश्चित्रन्देवा-
नाम् ॥ ४ ॥ तम्प्रत्क्थापूर्व्वथाव्विश्वथेमथाज्ज्येष्ठतातिम्बर्हिष-
दꣳस्वर्व्विदम् ॥ प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुघ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ह्वसे ॥ ५ ॥ अयंव्वेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्ज्जरायुरजसोव्विमाने ॥ इममपाꣳसंङ्गमेसूर्य्यस्यशिशुन्नव्विप्राम्मतिभीरिहन्ति ॥ ६ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्त्कमाजगन्तस्तस्थुषश्च ॥ ७ ॥ आनऽइडाभिर्व्विदथेसुशस्तिव्विश्वानरःसवितादेवऽएतु ॥ अपियथायुवानोमत्सथानोव्विश्वञ्जगदभिपित्वेमनीषा ॥ ८ ॥ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य सर्व्वन्तदिन्द्रतेव्वशे ॥ ९ ॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य ॥ व्विश्वमाभासि रोचनम् ॥ १० ॥ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मध्याकर्त्तोर्व्वितꣳसञ्जभार ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षदेदयुक्तहरितः÷सधस्थादादुद्राञ्छीघ्रासःस्तनुतेसिमस्मै ॥ ११ ॥
तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थे ॥ अनन्त-
मन्यद्दुशदस्यपाजः÷कृष्णमन्यद्धरितःसम्भरन्ति ॥ १२ ॥
वर्णमहाँ२ऽअसिसूर्य्यबडादित्यमहाँ२ऽअसि ॥ महस्तेसतोम-
हिमापनस्यतेऽद्धादेवमहाँ२ऽअसि ॥ १३ ॥ बट्सूर्य्यश्रवसामहाँ२
ऽअसिसत्रादेवमहाँ२ऽअसि ॥ महन्नादेवानामसुर्य्यः÷पुरोहितोऽवि-
भुज्ज्योतिरदाभ्यम् ॥ १४ ॥ श्रायन्तऽइवसूर्य्यंविश्वेदिन्द्रस्य-
भक्षत ॥ वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम ॥ १५ ॥
अदृश्रादेवाऽउदितासूर्य्यस्यनिरꣳहसःपिपृतानिरवद्यात् ॥ तन्नो-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मित्रोऽवरुणोमामहन्तामदितिःसिन्धुः पृथिवीऽउतद्यौः ॥ १६ ॥
आकृष्ण्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन-
सवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १७ ॥

इति रुद्रे चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

हरिः ॐ ॥ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः ॥ बाहु-
भ्यामुततेनमः ॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥
तयानस्तन्वाशन्तमयागिरिंशन्ताभिचाकशीहि ॥ २ ॥ यामिषुंगि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रिण्यन्तर्हस्तैर्बिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीꣳपुरुषञ्जगत् ॥ ३ ॥ शिवेनद्यचंसात्वागिरिशाच्छावदामसि ॥ यथानꣳसर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहीꣳश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्योधराचीꣳपरासुव ॥ ५ ॥ असौयस्ताम्म्रोऽअरुणऽउतब्भ्रुꣳसुमङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्रिताꣳसहस्रशोवैषाꣳहेडऽईमहे ॥ ६ ॥ असौयोऽवसर्प्पतिनीलग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्नदृष्ट्रन्नुदहार्य्र्यꣳसदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्वानोहन्तेभ्योऽकरन्नमः ॥ ८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुञ्च॑ धन्व॑न॒स्त्वमु॒भयो॒रार्त्न्यो॑र्ज्याम् ॥ याश्च॑ ते॒ हस्त॒ इष॑व॒: परा॒ता-
भ॑गवो॒ऽप ॥ ९ ॥ विज्य॒न्धनु॑: कप॒र्दिनो॒विश॑ल्यो॒बाण॑वाँ२ऽउ॒त ॥
अने॑शन्नस्य॒षाऽइष॑वऽआ॒भुर॑स्यनिषङ्गधि॒: ॥ १० ॥ या ते॑ । हे॒तिर्म्मी॑-
ढुष्टम॒ हस्ते॑ब॒भूव॑ ते॒धनु॑: ॥ तया॒स्मान्वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒परि॑-
भुज ॥ ११ ॥ परि॑ ते॒धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु॒विश्व॑त॑: ॥
अथो॑ऽइषु॒धिस्त॒वारे॒ऽअ॒स्मन्नि॑धे॒हि॒तम् ॥ १२ ॥ अव॑ त॒त्य॒धनु॑-
ष्ट्वꣳसह॑स्राक्ष॒शते॑षुधे ॥ नि॒शीर्य्य॑ श॒ल्यानाम्मुखा॑शि॒वो न॑: सुमना॑भव
॥ १३ ॥ नम॑स्त॒ऽआयु॑धायाना॑तताय धृ॒ष्ण॒वे ॥ उ॒भाभ्या॑मुत॒ ते॒न-
मो॑बाहु॒भ्या॑न्तव॒ धन्व॑ने ॥ १४ ॥ मानो॑म॒हान्त॑मु॒त मानो॑ऽअर्भ॒कम्मा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न॒ऽउक्षन्तमुत॒मान॑ऽउक्षि॒तम् ॥ मानो॑ व॒धीः॑पि॒तर॒म्मोत॑मा॒तर॒म्मान॑ः
प्रि॒यास्त॒न्वो रु॒द्रऽरी॑रिषः ॥ १५ ॥ मान॑स्तो॒के तन॑ये॒मान॒ऽआयु॑-
षि॒मानो॑गोषु॒मानो॒ऽअश्वे॑षुरीरिषः ॥ मानो॑ व्वी॒रान्रु॒द्रभा॑मिनो व॒धी-
र्हवि॑ष्म॒न्तः॑सद॒मित्त्वा॑हवामहे ॥ १६ ॥ नमो॑हिर॑ण्यबाहवे-
से॒नान्ये॑दि॒शाञ्च॒पत॑ये॒नमो॒नमो॑व्वृ॒क्षेभ्यो॒हरि॑केशेभ्यः॑प॒शूना॒म्पत॑ये॒नमो॒-
नम॑ः शष्पिञ्जरा॒य॒त्विषी॑मतेपथी॒नाम्पत॑ये॒नमो॒नमो॒हरि॑केशायोपवी॒तिने॑
पुष्टा॒नाम्पत॑ये॒नमो॒नमो॑बभ्लु॒शाय॑ ॥ १७ ॥ नमो॑बभ्लु॒शाय॑
व्याधिने॒ना॒नाम्पत॑ये॒नमो॒नमो॑भवस्य॒हेत्यै॑जग॒ता॒म्पत॑ये॒नमो॒नमो॑ रुद्रा-
या॑तताविने॒क्षेत्रा॑णा॒म्पत॑ये॒नमो॒नम॑ः सू॒ताया॑हन्त्यै॒वना॑ना॒म्पत॑ये॒नमो॒नमो॒-

CC-0. Agamnigam Digitization Foundation, Chandigarh.

रोहिताय ॥ १८ ॥ नमो रोहिताय स्थपतये वृक्षाणाम्पतये नमो-
नमो भुवन्तयेऽवारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणेऽवाणिजाय-
कक्षाणाम्पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमो नमः ÷
कृत्स्नायतया ॥ १९ ॥ नमः ÷ कृत्स्नायतया धावते सत्त्वनाम्पते-
ये नमो नमः ÷ सहमानाय निव्याधिनऽआव्याधिनीनाम्पतये नमो नमो निष-
ङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पते-
ये नमो नमो वञ्चते ॥ २० ॥ नमो वञ्चते परिवञ्चते स्तायूनाम्पतये-
नमो नमो निषङ्गिणऽइषुधिमते तस्कराणाम्पतये नमो नमः ÷ सृकायिभ्यो-
जिघाँसद्भ्यो मुष्णताम्पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्तानाम्पतयेनमः ॥ २१ ॥ नमोऽऊर्ध्वकेशिनेगिरित्रायकुलुञ्चानाम्पतयेनमोनमोऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमोऽआतन्वानेभ्यः प्रतिदधानेभ्यश्चवोनमोनमोऽआयच्छद्भ्योऽस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्यो विद्ध्यद्भ्यश्चवोनमोनमः शयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमः सभाभ्यः ॥ २३ ॥ नमः सभाभ्यः सभापतिभ्यश्चवोनमोनमोऽश्वेभ्योऽश्वपतिभ्यश्चवोनमोनमोऽआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृꣳहतीभ्यश्चवोनमोनमोगणेभ्यः ॥ २४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमो॑ गणे॒भ्यो॑ गणप॑तिभ्यश्च वो॒ नमो॒ नमो॑ व्रा॒ते॒भ्यो॑ व्रा॒त॒प॒तिभ्य॒-
श्च॒ वो॒ नमो॑ नमो॑ गृत्से॒भ्यो॑ गृत्स॒प॒तिभ्यश्च॒ वो॒ नमो॒ नमो॑ वि॒रू॒पे॒भ्यो॑ वि॒श्व॒-
रू॒पे॒भ्यश्च॒ वो॒ नमो॒ नम॒: से॒ना॒भ्य॑: ॥ २५ ॥ नम॒: से॒ना॒भ्य॑:
से॒ना॒नि॒भ्य॑श्च॒ वो॒ नमो॒ नमो॑ र॒थि॒भ्यो॑ऽअ॒र॒थे॒भ्य॑श्च॒ वो॒ नमो॒ नम॑: क्ष॒त्तृ॒-
भ्य॑: सङ्ग्रही॒तृ॒भ्य॑श्च॒ वो॒ नमो॒ नमो॑ महद्भ॒यो॑ऽअर्भ॒के॒भ्य॑श्च॒ वो॒ नम॑:
॥ २६ ॥ नम॒स्त॒क्षभ्यो॑ रथका॒रे॒भ्य॑श्च॒ वो॒ नमो॒ नम॒: कु॒ला॒ले॒भ्य॑:
क॒र्म्मा॒रे॒भ्य॑श्च॒ वो॒ नमो॒ नमो॑ निषा॒दे॒भ्य॑: पुञ्जिष्ठे॒भ्य॑श्च॒ वो॒ नमो॒ नम॑:
श्व॒नि॒भ्यो॑ मृगयु॒भ्य॑श्च॒ वो॒ नमो॒ नम॒: श्व॒भ्य॑: ॥ ॥ २७ ॥ नम॒:
श्व॒भ्य॑: श्वप॑तिभ्यश्च॒ वो॒ नमो॒ नमो॑ भ॒वा॒य॑ च रु॒द्रा॒य॑ च॒ नम॑: श॒र्वा॒य॑ च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पशुपतयेचनमोनीलग्रीवायचशितिकण्ठायचनमः कपर्द्दिनेँ ॥ २८ ॥
नमः कपर्द्दिनेँ चव्युप्तकेशायचनमः सहस्राक्षायचशतधन्वने
चनमोगिरिशायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्र-
स्वाय ॥ २९ ॥ नमोह्रस्वाय चवामनायचनमोवृहतेचवर्षीयसेच
नमोव्वृद्धायचसंवृधेचनमोऽग्र्यायचप्रथमायचनमऽआशवेँ ॥ ३० ॥
नमऽआशवेँ चाजिरायचनमःशीघ्र्यायचशीभ्यायचनमऽऊर्म्म्यां-
यचावस्वन्न्यायचनमोनादेयायचद्वीप्यायच ॥ ३१ ॥ नमोज्ज्ये-
ष्ठायचकनिष्ठायचनमः पूर्व्वजायचापरजायचनमोमध्यमायचापग-
ल्भायचनमोजघन्न्यायचबुध्न्यायचनमःसोभ्यायँ ॥ ३२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमः॑सोम्या॑य च॒प्रति॑सर्व्वा॑यच॒नमो॒वाम्या॑यच॒क्षेम्या॑यच॒नमः॑
श्लोक्या॑यचावसा॒न्या॑यच॒नमः॑ऽउर्व्व॒र्य्या॑यच॒खल्या॑यच॒नमो॒वन्या॑य
॥३३॥ नमो॒व्वन्या॑य च॒कक्ष्या॑यच॒नमः॑÷श्श्र॒वाय॑च॒प्रति॑श्श्र॒वाय॑च॒नमः॑ऽ
आशु॒षे॑णायच॒राशु॒र॑थायच॒नमः॑शू॒रा॑यचावभे॒दिने॑च॒नमो॑वि॒ल्मिने॑ ॥३४॥
नमो॑बि॒ल्मिने॑ चकव॒चिने॑च॒नमो॑व्व॒र्म्मिणे॑चव॒रूथि॑ने॑च॒नमः॑÷श्श्रु॒ता॑यच
श्श्रुतसे॒ना॑यच॒नमो॑दुन्दु॒भ्या॑यचाहन॒न्या॑यच॒नमो॑धृ॒ष्ण॑वे॑ ॥ ३५ ॥
नमो॑धृ॒ष्ण॑वे॑ चप्रमृ॒शा॑यच॒नमो॑निषङ्गि॒णे॑चेषुधि॒मते॑च॒नमः॑स्तीक्ष्णेष॑वे
चायुधि॒ने॑च॒नमः॑÷स्वायु॒धा॑यच॒सुध॑न्व॒ने॑च ॥ ३६ ॥ नमः॑स्रु॒त्या॑य
च॒पथ्या॑यच॒नमः॑काट्स्या॑यच॒नीप्या॑यच॒नमः॑कुल्या॑यचसर॒स्या॑यच॒न-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मौनादेयायचवैशन्तायचनमः कूप्यायं ॥ ३७ ॥ नमः कूप्यायं-
चावट्यायचनमोव्वीद्ध्यायचातप्यायचनमोमेघ्यायचविद्युत्याय
चनमोवर्ष्यायचावर्ष्यायचनमोवात्यायं ॥ ३८ ॥ नमोवात्यायं
धरेष्मयायचनमोव्वास्तव्यायचवास्तुपायचनमः सोमायचरुद्रायचन-
मस्ताम्राय चारुणायचनमः शङ्गवे ॥ ३९ ॥ नमः शङ्गवे
चपशुपतयेचनमऽउग्राय चभीमायचनमोऽग्रेवधायचदूरेवधायचनमो
हन्त्रेचहनीयसेचनमोव्वृक्षेभ्योहरिकेशेभ्योनमस्तारायं ॥ ४० ॥
नमः शम्भवायं चमयोभवायचनमः शङ्कायचमयस्कायचनमः
शिवायचशिवतरायच ॥ ४१ ॥ नमः पार्ष्यायं चावार्ष्यायचनमः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमः शष्प्यायच-
फेन्यायचनमः सिकत्याय ॥ ४२ ॥ नमः सिकत्याय चप्रवा-
ह्यायचनमः किꣳशिलायचक्षयणायचनमः कपर्दिनेचपुलस्तयेचनम
इरिण्यायचप्रपत्थ्यायचनमोव्रज्याय ॥ ४३ ॥ नमोव्रज्याय
चगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृद्ध्यायचनिवेष्प्यायचनमः
काट्ट्यायचगह्वरेष्ठायचनमः शुष्क्याय ॥ ४४ ॥ नमः शुष्क्याय
चहरित्यायचनमः पाꣳसव्यायचरजस्यायचनमोलोप्यायचोलप्याय
चनमऽऊर्व्यायचसूर्व्यायचनमः पर्ण्याय ॥ ४५ ॥ नमः पर्ण्या-
यचपर्णशदायचनमऽउद्गुरमाणायचाभिघ्नतेचनमऽआखिदतेचप्र-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षिद्भ्यस्ते नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवा-
नाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः ॥ ४६ ॥ द्रापे ऽअन्धसस्पते दरिद्रन्नील लोहित । आसाम्प्रजानामेषाम्पशूनाम्मा भेर्म्मारो ङ्मो चनः किञ्चनाममत् ॥ ४७ ॥ इमा रुद्राय । तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथाशमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यास्ते रुद्रशिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुतस्य भेषजीतया नो मृड जीवसे ॥ ४९ ॥ परि नो रुद्रस्य हेतिर्व्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः ॥ अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ५० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नंयायमृड ॥ ५० ॥ मीढुष्टमशिवतमशिवोनः सुमनाभव ॥ परमे-
ष्वृक्षऽआयुधन्निधायकृत्तिंवसानऽआचरपिनाकम्बिभ्रदागहि ॥ ५१ ॥
त्विषिकिरिद्रविलोहितनमस्तेऽअस्तुभगवः । यास्तेसहस्रंहेतयोऽन्य-
मस्मन्निवपन्तुताः ॥५२॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः ॥
तासामीशानोभगवःपराचीनामुखाकृधि ॥ ५३ ॥ असंख्याताःसहस्र-
साणिषेरुद्राऽअधिभूम्यांम् ॥ तेषाꣳसहस्रयोजनेऽवधन्वानितन्मसि
॥ ५४ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाꣳसहस्र-
योजनेऽवधन्वानितन्मसि ॥ ५५ ॥ नीलग्रीवाःशितिकण्ठादिवꣳरु-
द्राऽउपश्रिताः ॥ तेषाꣳसहस्रयोजनेऽवधन्वानितन्मसि ॥ ५६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नीलग्रीवाः शितिकण्ठाः शर्वाऽअधःक्षमाचराः ॥ तेषाꣳसहस्रयोज-
नेऽवधन्वानितन्मसि ॥ ५७ ॥ येवृक्षेषु शष्पिञ्जराऽनीलग्री-
वाविलोहिताः ॥ तेषाꣳसहस्रयोजनेऽवधन्वानितन्मसि ॥ ५८ ॥
येभूतानामधिपतयोविशिखासः कपर्दिनः ॥ तेषाꣳसहस्रयोजनेऽव-
धन्वानितन्मसि ॥ ५९ ॥ येपथाम्पथिरक्षयऽऐलवृदाऽआयुर्युधः ।
तेषाꣳसहस्रयोजनेऽवधन्वानितन्मसि ॥ ६० ॥ येतीर्थानि-
प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳसहस्रयोजनेऽवधन्वानित-
न्मसि ॥ ६१ ॥ येन्नेषु विविध्यन्तिपात्रेषुपिबतोजनान् ॥
तेषाꣳसहस्रयोजनेऽवधन्वानितन्मसि ॥ ६२ ॥ षऽएतावन्तश्च-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूया॑ꣳसश्च॒दिशो॑रुद्रा॒न्वितस्थि॒रे ॥ तेषा॑ꣳसहस्रयोज॒नेऽव॒धन्वा॑नि-
तन्मसि ॥ ६३ ॥ नमो॑ऽस्तु । रु॒द्रेभ्यो॒येदि॒विषे॑षा॒ंव्वर्ष॑मिष॒वः ॥
तेभ्यो॒दश॒प्राची॒र्दश॑॑दक्षि॒णादश॑॑प्र॒तीची॒र्दश॑॑दी॒ची॒र्दश॒॒ोदू॒र्ध्वाः ॥
तेभ्यो॒नमो॑ऽअस्तु॒तेनो॑ऽवन्तु॒तेनो॑मृडयन्तु॒तेषन्द्वि॒ष्मोयश्च॑॑नो॒द्वेष्टि॒तमे॑-
षा॒ञ्जम्भे॑ददध्मः ॥ ६४ ॥ नमो॑ऽस्तु । रु॒द्रेभ्यो॒येऽन्तरि॑क्षे॒षे॒षा॒ंव्वात॒
ऽइष॑॑वः ॥ तेभ्यो॒दश॒प्राची॒र्दश॑॑दक्षि॒णादश॑॑प्र॒तीची॒र्दश॑॑दी॒ची॒र्दश॒॒ो-
दू॒र्ध्वाः ॥ तेभ्यो॒नमो॑ऽअस्तु॒तेनो॑ऽवन्तु॒तेनो॑मृडयन्तु॒तेषन्द्वि॒ष्मोयश्च॑॑
नो॒द्वेष्टि॒तमे॑षा॒ञ्जम्भे॑ददध्मः ॥ ६५ ॥ नमो॑ऽस्तु । रु॒द्रेभ्यो॒येपृ॑थि॒-
व्यॉ॑ऽये॒पा॒मन्न॒मिष॑॑वः ॥ तेभ्यो॒दश॒प्राची॒र्दश॑॑दक्षि॒णादश॑॑प्र॒तीची॒-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईशोदीचीर्ईशोदूर्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोऽवन्तुतेनोमृडयन्तुतेय-
न्द्विष्मोयश्चनोदूढ्येद्भितमैषाञ्जम्भेददूध्मः ॥ ६६ ॥

इति रुद्रे पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

हरिः ॐ ॥ ध्वयः सामव्रतेतवमनस्तनूषुबिभ्रतः । प्रजा-
वन्तःसचेमहि ॥ १ ॥ पुषतैरुद्रभागःसहस्वस्राम्बिकयातज्जुषः-
स्वस्वाहैषतैरुद्रभागऽआखुस्तैपशुः ॥ २ ॥ अवरुद्रमदीमहयवदेव-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्र्यम्बकम् ॥ यथानोव्वस्यसस्करद्यथानःश्रेयसस्करद्यथानो व्यवसायया॑त् ॥ ३ ॥ भेषजमसि भेषजङ्गवेऽश्वा॑यपुरुषायभेषजम्। सुखम्मेषायमेष्यै ॥ ४ ॥ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥ त्र्यम्बकं य्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि ॥ अवततधन्वापिनाकावसःकृत्तिवासाऽअहिंसन्नःशिवोतीहि ॥ ६ ॥ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ७ ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तु

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मामाहिꣳसीः ॥ निर्वर्त्तयाम्यायुषेन्नाद्यायप्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ॥ ८ ॥

इति रुद्रे षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः

हरिः ॐ ॥ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ॥ सासह्वाँश्चाभियुग्वा चाक्षिप्रः स्वाहा ॥ १ ॥ अग्निꣳहृदयेनाशनिꣳहृदयाग्रेणपशुपतिङ्कृत्स्नहृदयेनभवँस्यक्का ॥ शर्व्वम्मतस्त्राभ्यामी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शानम्मन्युनामहादेवमन्तःपर्शव्येनोग्रन्देवंव्वनिष्ठुनाव्वसिष्ठहनुः
शिक्कीनिकोश्श्याभ्याम् ॥ २ ॥ उग्रँल्लोहितेन मित्रꣳसौव्वर्त्त्येनरुद्र-
न्दौव्वर्त्त्येनेन्द्रम्प्रक्रीडेनमरुतोबलेनसाढ्यान्प्रमुदा ॥ भवस्यकण्ठ्यꣳ-
रुद्रस्यान्तःपाश्श्यर्य्यम्महादेवस्ययकृच्छ्लोम्नस्यव्वनिष्ठुः पशुपतेःपुरी-
तत् ॥ ३ ॥ लोमभ्यःस्वाहा लोमभ्यःस्वाहात्वचेस्वाहात्वचेस्वाहा
लोहितायस्वाहालोहितायस्वाहामेदोभ्यःस्वाहामेदोभ्यःस्वाहा ॥
माꣳसेभ्यःस्वाहामाꣳसेभ्यःस्वाहास्नावभ्यःस्वाहास्नावभ्यःस्वा-
हाऽस्थभ्यःस्वाहाऽस्थभ्यःस्वाहामज्ञभ्यःस्वाहामज्ञभ्यःस्वाहा॥
रेतसेस्वाहापायवेस्वाहा ॥ ४ ॥ आयासायस्वाहा प्रायासायस्वाहा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सꣳश्वासायश्वाहाप्श्वियासायश्वाहोद्श्वासायश्वाहा ॥ शुचेश्वाहाशो-
चते श्वाहाशोचमानायश्वाहा शोकायश्वाहा ॥ ५ ॥ तपसेश्वाहा
तप्यतेश्वाहातप्यमानायश्वाहातप्तायश्वाहाघर्म्मायश्वाहा ॥ निष्कृ-
त्यैश्वाहाप्प्रायश्चित्त्यैश्वाहाभेषजायश्वाहा ॥ ६ ॥ यमायश्वाहान्त-
कायश्वाहामृत्यवेश्वाहा ॥ ब्रह्मणेश्वाहाब्रह्महत्यायैश्वाहाविश्वेभ्यो
देवेभ्यश्श्वाहाद्यावापृथिवीभ्याꣳश्वाहा ॥ ७ ॥

इति रुद्रे सप्तमोऽध्यायः ॥ ७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथाष्टमोऽध्यायः

हरिः ॐ ॥ वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीति-
श्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्रवश्चमेश्रुतिश्चमेज्ज्योतिश्च-
मेस्वश्चमेयज्ञेनकल्पन्ताम् ॥ १ ॥ प्राणश्च मेऽपानश्चमेव्यानश्च-
मेसुश्चमेचित्तञ्चमऽआधीतञ्चमेवाक्चमेमनश्चमेचक्षुश्चमेश्रोत्रञ्च
मेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥ २ ॥ ओजश्चमेसहश्चमऽ-
आत्क्रमाचमेतनूश्चमेशर्मचमेवर्मचमेऽङ्गानिचमेऽस्थानिचमेपरू ꣳ-
षिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ ज्यै-
ष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमेऽमश्चमेऽम्भश्चमेजे-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माचमेमहिमाचमेव्वरिमाचमेप्रथिमाचमेव्वर्षिमाचमेद्राघिमाचमेव्वृद्ध-
श्चमेव्वृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ सत्यश्चमे श्रद्धाचमेज-
गच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्रीडाचमेमोदश्चमेजातञ्चमेजनि-
ष्यमाणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनकल्पन्ताम् ॥५॥ ऋतञ्चमेऽमृत-
ञ्चमेऽयक्ष्मञ्चमेऽनामयच्चमेजीवातुश्चमेदीर्घायुत्वञ्चमेऽनमित्रञ्चमेऽभ-
यञ्चमेसुखञ्चमेशयनञ्चमेसुषाश्चमेसुदिनञ्चमेयज्ञेनकल्पन्ताम् ॥ ६ ॥
यन्ताचमेधर्त्ताचमेक्षेमश्चमेधृतिश्चमेविश्वञ्चमेमहश्चमेसंविच्च
मेज्ञात्रञ्चमेसूश्चमेप्रसूश्चमेसीरञ्चमेलयश्चमेयज्ञेनकल्पन्ताम् ॥७॥
शञ्चमेमयश्चमेप्रियञ्चमेऽनुकामश्चमेकामश्चमेसौमनसश्चमेभग-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्च्चमेद्रविंणश्चमेभद्रश्चमेश्रेयश्च्चमेव्वसीयश्च्चमेयशश्च्चमेयज्ञेनक-
ल्पन्ताम् ॥ ८ ॥ ऊक्च्चमेसुनृताचमेपयश्च्चमेरसश्च्चमेघृतश्च्च
मेमधुचमेसग्धिश्च्चमेसपीतिश्च्चमेकृषिश्च्चमेव्वृष्टिश्च्चमेजैत्रश्चम
ऽऔद्भिद्यश्चमेयज्ञेनकल्पन्ताम् ॥ ९ ॥ रयिश्च्चमेरायश्च्चमेपुष्ट-
श्चमेपुष्टिश्च्चमेव्विभुचमेप्रभुचमेपूर्णश्चमेपूर्णतरश्चमेकुयवश्चमेऽक्षि-
तश्चऽमेन्नश्चमेऽक्षुच्चमेयज्ञेनकल्पन्ताम् ॥ १० ॥ व्वित्तश्चमेव्वेद्यश्चमे
भूतश्चमेभविष्यच्चमेसुगश्चमेसुपत्थ्यश्चमऽऋद्धश्चमऽऋद्धिश्च्चमेक्लृ-
प्तश्चमेक्लृप्तिश्च्चमेमतिश्च्चमेसुमतिश्च्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥
व्व्रीहयश्च्चमेयवाश्च्चममाषाश्च्चमेतिलाश्च्चमेमुद्गाश्च्चमेखल्वा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इच्चमेप्रियङ्गवश्च्चमेऽणवश्च्चमेश्श्यामाकाश्च्चमेनवाराश्च्चमेगोधू-
माश्च्चमेमसूराश्च्चमेयज्ञेनकल्पन्ताम् ॥ १२ ॥ अश्म्माचमेमृत्तिका
चमेगिरयश्च्चमेपर्व्वताश्च्चमेसिकताश्च्चमेव्वनस्पतयश्च्चमेहिर-
ण्ययञ्चमेऽयश्च्चमेश्श्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ताम्
॥ १३ ॥ अग्निश्च्चमऽआपश्च्चमेव्व्रीरुधश्च्चमऽओषधयश्च्चमेकृष्ट-
पच्च्याश्च्चमेकृष्टपच्च्याश्च्चमेग्राम्याश्च्चमेपशवऽआरण्याश्च्च
मेव्वित्तञ्चमेव्वित्तिश्च्चमेभूतञ्चमेभूतिश्च्चमेयज्ञेनकल्पन्ताम् ॥ १४ ॥
व्वसुचमेव्वसतिश्च्चमेकर्म्मचमेशक्तिश्च्चमेऽर्थश्च्चमऽएमश्च्चमऽ
इत्याच्चमेगतिश्च्चमेयज्ञेनकल्पन्ताम् ॥ १५ ॥ अग्निश्च्चमऽइन्द्रश्च्चमे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोमश्च॒म॒ऽइन्द्र॑श्च॒मेस॑वि॒ताच॑म॒ऽइन्द्र॑श्च॒मे॒सर॑स्वतीच॒म॒ऽइन्द्र॑श्च
मेपू॒षाच॑म॒ऽइन्द्र॑श्च॒मे॒बृह॒स्प॒तिश्च॒म॒ऽइन्द्र॑श्च॒मे॒य॒ज्ञेन॑कल्पन्ताम्
॥१६॥ मि॒त्रश्च॑म॒ऽइन्द्र॑श्च॒मे॒व॒रु॑णश्च॒म॒ऽइन्द्र॑श्च॒मे॒धा॒ता॑च॒म॒ऽ
इन्द्र॑श्च॒मे॒त्वष्टा॑च॒म॒ऽइन्द्र॑श्च॒मे॒म॒रु॒त॑श्च॒म॒ऽइन्द्र॑श्च॒मे॒ऽश्विश्वै॑चमे
दे॒वाऽइन्द्र॑श्च॒मे॒य॒ज्ञेन॑कल्पन्ताम् ॥१७॥ पृ॒थि॒वी॑च॒म॒ऽइन्द्र॑श्च॒मे॒ऽन्त-
रि॑क्षञ्च॒म॒ऽइन्द्र॑श्च॒मे॒द्यौश्च॒म॒ऽइन्द्र॑श्च॒मे॒स॒मा॑श्च॒म॒ऽइन्द्र॑श्च॒मे॒न-
क्ष॑त्राणिच॒म॒ऽइन्द्र॑श्च॒मे॒दिश॑श्च॒म॒ऽइन्द्र॑श्च॒मे॒य॒ज्ञेन॑कल्पन्ताम् ॥१८॥
अ॒ह॒श्शु॒श्च॑मे॒र॒श्मिम॑श्च॒मे॒ऽदा॑भ्यश्च॒मे॒ऽधि॑पतिश्चमऽउपा॒ꣳशु॑श्च॒मे॑-
ऽन्तर्य्या॒म॑श्च॒मऽऐन्द्र॑वाय॒व॑श्च॒मे॒मैत्रा॑व॒रु॑णश्च॒मऽआ॑श्विन॑श्च॒मे॑-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिप्रस्थानश्च्वमेशुक्रश्च्वमेमन्थीच्वमेयज्ञेनकल्पन्ताम् ॥ १९ ॥
आग्रयणश्च्वमेवैश्वदेवश्च्वमेध्रुवश्च्वमेवैश्वानरश्च्वमऽऐन्द्राग्न-
श्च्वमेमहाँवैश्वदेवश्च्वमेमरुत्वतीयाश्च्वमेनिष्केवल्यश्च्वमेसावि-
त्रश्च्वमेसारस्वतश्च्वमेपात्नीवतश्च्वमेहारियोजनश्च्वमेयज्ञेनकल्प-
न्ताम् ॥ २० ॥ स्रुचश्च्वमेचमसाश्च्वमेव्वायव्यानिच्वमेद्रोणकल-
शश्च्वमेग्रावाणश्च्वमेऽधिषवणेचमेपूतभृच्च्वमऽआधवनीयश्च्वमेव्वेदि-
श्च्वमेबर्हिश्च्वमेऽवभृथश्च्वमेस्वगाकारश्च्वमेयज्ञेनकल्पन्ताम् ॥ २१ ॥
अग्निश्च्वमेघर्मश्च्वमेऽर्कश्च्वमेसूर्य्यश्च्वमेप्राणश्च्वमेऽश्वमेधश्च्वमे-
पृथिवीचमेऽदितिश्च्वमेदितिश्च्वमेद्यौश्च्वमेऽङ्गुलयःशक्वरयोदिशश्च्व

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मेषष्ठेनकल्पन्ताम् ॥ २२ ॥ व्रतश्चमऽऋतवश्चमेतपश्चमेसंव-
त्सरश्चमेऽहोरात्रेऽऊर्व्वष्ठ्ठीवेबृहद्रथन्तरेचमेषष्ठेनकल्पन्ताम्॥२३॥
एकाचमेतिस्रश्चमेतिस्रश्चमेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेनव-
चमेनवचमऽएकादशचमऽएकादशचमेत्रयोदशचमेत्रयोदशचमेपञ्चद-
शचमेपञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमेनवदशचमऽएक-
षिंशतिश्चमऽएकविंशतिश्चमेत्रयोविंशतिश्चमेत्रयोविंशति-श-
तिश्चमेपञ्चविंशतिश्चमेपञ्चविंशतिश्चमेसप्तविंशतिश्चमेस-
प्तविंशतिश्चमेनवविंशतिश्चमेनवविंशतिश्चमऽएकत्रिंशत्-श-
चमऽएकत्रिंशच्चमेत्रयस्त्रिंशच्चमेषष्ठेनकल्पन्ताम् ॥ २४ ॥ चतं-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽश्चश्चमेऽष्टौचमेऽष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडशचमेविंश-
तिश्चमेविंशतिश्चमेचतुर्विंशतिश्चमेचतुर्विंशतिश्चमेऽष्टा-
विंशतिश्चमेऽष्टाविंशतिश्चमेद्वात्रिंशच्चमेद्वात्रिंशच्चमेषट्त्रिं-
शच्चमेषट्त्रिंशच्चमेचत्वारिꣳशच्चमेचत्वारिꣳशच्चमेचतुश्चत्वारिं-
शच्चमेचतुश्चत्वारिꣳशच्चमेऽष्टाचत्वारिꣳशच्चमेसꣳस्रेनकल्पन्ताम्
॥ २५ ॥त्र्यविंशच्चमेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चाविंशच्च
मेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीचमेसꣳस्रेन-
कल्पन्ताम् ॥ २६ ॥ पष्ठवाट्चमेपष्ठौहीचमऽउक्षाचमेवशाचम
ऽऋषभश्चमेवेहच्चमेनड्वाँश्चमेधेनुश्चमेसꣳस्रेनकल्पन्ताम् ॥२७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ष्ठाजा॑यस्वाहाप्प्रस॒वाय॒स्वाहा॑ऽपि॒जाय॒स्वाहा॒क्रन्त॑वे॒स्वाहा॒व्यस॑वे॒स्वाहा॑ऽ-
हु॒र्प्पत॑ये॒स्वाहा॒ह्नेमु॒ग्ध्धाय॒स्वाहा॒सुग्ध्धाय॑व्वैन॒ꣳ॒शि॒नाय॒स्वाहा॑व्विन॒ꣳ॒शि-
न॑ऽआन्त्याय॒नाय॒स्वाहान्त्या॑यभौव॒नाय॒स्वाहा॒भुव॑नस्य॒पत॑ये॒स्वाहाधिप-
तये॒स्वाहाप्प्र॒जाप॑तये॒स्वाहा॑ ॥ इ॒यन्ते॒राण्प्मि॒त्रायं॑यन्ता॒सि॒षम॑नऽऊ॒र्जे-
त्वा॒व्वृष्ट्यै॑त्वाप्प्र॒जान॒न्त्वाधि॑पत्याय ॥ २८ ॥ आयु॑र्य्य॒ज्ञेन॑कल्प्पता-
म्प्रा॒णोय॒ज्ञेन॑कल्प्पता॒श्चक्षु॑र्य्य॒ज्ञेन॑कल्प्पता॒ꣳ॒श्रोत्रं॑य॒ज्ञेन॑कल्प्पता॑व्वाग्य॒-
ज्ञेन॑कल्प्पता॒म्मनो॑य॒ज्ञेन॑कल्प्पता॒मात्क्मा॑य॒ज्ञेन॑कल्प्पता॑ब्ब्रह्मा॑य॒ज्ञेन॑कल्प्प-
ता॒ज्ज्योति॑र्य्य॒ज्ञेन॑कल्प्पता॒ꣳ॒स्व॑र्य्य॒ज्ञेन॑कल्प्पता॒म्पृ॒ष्ठं॒य॒ज्ञेन॑कल्प्पता॑ꣳय॒-
ज्ञोय॒ज्ञेन॑कल्प्पताम् ॥ स्तोम॑श्च॒यज्ञु॑श्च॒ऽऋक्च॒साम॑च॒बृह॑च्च॒रथ॑न्त-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रज्ञं । स्वर्हवाऽअगन्म्मामृताऽअभूमप्रजापतेः प्रजाऽअभूम्व्वेट्
स्वाहा ॥ २९ ॥

इति रुद्रेऽष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः

हरिः ॐ ॥ ऋचंव्वाचम्प्रपद्येमनोयजुः प्रपद्येसाम्प्राणम्प्रपद्ये
चक्षुः श्रोत्रम्प्रपद्ये ॥ व्वागोजः सहौजोमयि प्राणापानौ ॥ १ ॥
यन्मेच्छिद्रञ्चक्षुषोहृदयस्यमनसोव्वातितृण्णम्बृहस्पतिर्म्मेतद्दधातु ॥
शन्नोभवतुभुवनस्ययस्पतिः ॥ २ ॥ भूर्भुवः स्वः तत्सवितुर्व्व-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रे॑ ण्यम्भगो॑दे॒वस्य॑धीमहि ॥ धियो॒योन॑ः॒प्रचो॒दया॑त् ॥ ३ ॥ कया॑न-
श्चि॒त्र॒ऽआभु॑वदू॒तीस॒दावृ॑धः॒सखा॑ । कया॒शचि॑ष्ठ॒यावृ॒ता ॥ ४ ॥
कस्त्वा॑स॒त्योमदा॑ना॒म्म॑ꣳहि॒ष्ठोमत्स॒दन्ध॑सः ॥ दृ॒ढाचि॑दा॒रुजे॒
व्यसु॑ ॥ ५ ॥ अभी॑षु॒णः॒सखी॑नामवि॒ताज॑रि॒तॄणाम् ॥ श॒तम्भ॑वा-
स्यू॒तिभि॒॑ ॥ ६ ॥ कया॑त्वन्न॑ऽऊ॒त्याभिप्रम॑न्दसेवृषन् ॥ कया॑स्तो-
तृभ्य॒ऽआभ॑र ॥ ७ ॥ इन्द्रो॒विव॑श्वस्यराजति ॥ शन्नो॑ऽअस्तुद्वि॒-
पदे॒शञ्चतु॑ष्पदे ॥ ८ ॥ शन्नो॑मि॒त्रः॒शंव॑रु॑ण॒ः॒शन्नो॑भवत्वर्य॒मा ॥
शन्न॒ऽइन्द्रो॑बृह॒स्पति॒ः॒शन्नो॒विष्णु॑रुरुक्र॒मः॒ ॥ ९ ॥ शन्नो॒ व्वात॒॑प-
व॒ताꣳशन्न॑स्त॒पत॑ु॒ सूर्य॒॑ ॥ शन्न॒ः॒कनि॑क्रदद्देव॒ः॒पर्ज॑न्यो॑ऽअभिवर्षत

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥१०॥ अहा॑नि॒शम्भ॑वन्तुन॒ः शङ्॒रात्री॑ः॒प्रति॑धीयताम् ॥ शन्न॑ऽइन्द्रा॒ग्नी भ॑व॒ता॒मवो॑भि॒ः॒शन्न॒ऽइन्द्रा॑वरु॒णारा॒तह॑व्या ॥ शन्न॑ऽइन्द्रापू॒षणा॒वाज॑सातौ॒शमिन्द्रा॑सोमा॒सु॒वि॒ता॒यशं॑यो॒ः ॥ ११ ॥ शन्नो॑दे॒वीर॒भिष्ट॑य॒ऽआपो॑भवन्तुपी॒तये॑ ॥ शंयो॒र॒भिस्र॑वन्तुन॒ः ॥ १२ ॥ स्यो॒ना पृ॑थिविनोभवानृक्ष॒रानि॒वेश॑नी ॥ यच्छा॑न॒ः॒शर्म॑स॒प्रथा॒ः ॥ १३ ॥ आपो॒हिष्ठा॑म॒यो॒भु॒व॒स्तान॑ऽऊ॒र्ज्जे॑द॑धातन ॥ म॒हेर॒णा॒य॒चक्ष॑से ॥ १४ ॥ यो॑व॒॑ः॒शि॒व॒त॒मो॒र॒स॒स्तस्य॑भाजयते॒ह॑न॒॑ः । उ॒श॒तीरि॑व॒मा॒त॑र॒॑ः ॥ १५ ॥ तस्मा॑ऽअर॒ङ्ग॒मामवो॒यस्य॒क्षया॑य॒जिन्व॑थ । आपो॑ज॒न॒य॒थाच॑न॒ः ॥१६॥ द्यौः॒शान्ति॑र॒न्तरि॑क्ष॒ः॒शान्ति॒॑ः॒पृथि॒वीशान्ति॒रापः॒शान्ति॒रो॒ष॒ध॒य॒ः॒शा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्ति÷ ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ १७ ॥ दृते दꣳह मा मित्रस्य मा चक्षुषा सर्व्वाणि भुतानि समीक्षन्ताम् । मित्रस्याहꣳ चक्षुषा सर्व्वाणि भुतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥ दृते दꣳह मा । ज्योक्ते सन्दृशि जीव्यासꣳ ज्योक्ते सन्दृशि जीव्यासम् ॥ १९ ॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तु हेतयः÷ पावको ऽअस्मभ्यꣳ शिवो भव ॥ २० ॥ नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे ॥ नमस्ते भगवन्नस्तु यतꣳ स्व÷ समीहसे ॥ २१ ॥ यतो-यतꣳ समीहसे ततो नो ऽअभयङ्कुरु ॥ शन्न÷ कुरुप्रजाभ्यो ऽभयन्नः पशु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्यः॑ ॥ २२ ॥ सु॒मि॒त्रि॒या न॒ऽआप॒ऽओष॑धयः॑सन्तुदुर्म्मित्रि॒यास्त॒स्मै॒सन्तु॒योस्म्मान्द्वेष्टि॒यञ्च॑व॒यन्द्वि॒ष्म॒ः ॥ २३ ॥ तच्चक्षु॑र्दे॒वहि॑त॒म्पुर॒स्ता॑च्छु॒क्रमु॒च्च॑रत् ॥ 'पश्ये॑मश॒र॑द॑ः॑श॒तञ्जीवे॑मश॒र॑द॑ः॑श॒तꣳ शृणु॑याम॒श॒र॑द॑ः॑श॒तंप्र॑ब्र॒वामश॒र॑द॑ः॑श॒तमदी॑नाः॑स्याम॒श॒र॑द॑ः॑श॒तम्भूय॑श्च॒ श॒र॑द॑ः॑श॒तात् ॥ २४ ॥

इति रुद्रे शान्त्यध्यायः ॥

अथ स्वस्तिमन्त्रपाठः

अथ स्वतिप्रार्थनामन्त्राध्यायः ॥ हरि॑ः॑ॐ । स्व॒स्ति॒न॒

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽइन्द्रोव्वृद्धश्रवाःस्वस्तिनः÷पूषाव्विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽ
अरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ ॐ पयः÷पृथिव्या-
म्पयऽओषधीषुपयोदिव्युन्तरिक्षेपयोधाः । पयस्वतीःप्रदिशः÷सन्तु
मह्यम् ॥ २ ॥ ॐ व्विष्णोरराटमसिव्विष्णोःश्नप्त्रेस्थोव्विष्णोः
स्यूरसिव्विष्णोर्ध्रुवोऽसि ॥ व्वैष्णवमसिव्विष्णवेत्वा ॥ ३ ॥
ॐ अग्निर्देवताव्वातोदेवतासूर्य्योदेवताचन्द्रमादेवताव्वसवोदेवतारुद्र-
द्रादेवतादित्यादेवतामरुतोदेवताव्विश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रो
देवताव्वरुणोदेवता ॥ ४ ॥ ॐ सद्योजातंप्रपद्यामिसद्योजाताय्वैन-
मोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ ५ ॥ व्वामदे-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

घायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमःकलविकरणा-
यनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनाय-
नमोमनोन्मनायनमः ॥ ६ ॥ अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः ॥
सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ ७ ॥ तत्पुरुषायविद्महे
महादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ ८ ॥ ईशानःसर्वविद्यानां-
मीश्वरः सर्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिब्रह्माशिवोमेअस्तु
सदाशिवोम् ॥९॥ ॐ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामा-
हिꣳसीः ॥ निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषाय सुप्र-
जास्त्वायसुवीर्य्यायं ॥ १० ॥ ॐ विश्वानिदेवसवितर्दुरितानिप-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्रासुव ॥ यद्भद्रन्तन्न आसुव ॥ ११ ॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ
शान्ति ÷ पृथिवीशान्तिरापः शान्तिरोषधयः शान्ति÷ ॥ वनस्प-
तयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेव
शान्तिः सामा शान्तिरेधि ॥१२॥ ॐ सर्व्वेषां वा एष वेदानाꣳरसो
यत्साम सर्व्वेषामेवैनमेतद्वेदानाꣳरसेनाभिषिञ्चति ॥१३॥ ॐशान्तिः
शान्तिः शान्तिःसुशान्तिर्भवतु ॥ सर्वारिष्टशान्तिर्भवतु ॥ अनेन रुद्रा-
भिषेककर्मणा श्रीमहारुद्रः प्रीयतां न मम ॐसदाशिवार्पणमस्तु ॥

॥ इति स्वस्तिप्रार्थनामन्त्राध्ययः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ शिवापराधक्षमापनस्तोत्रम्

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं, रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं, विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ १ ॥ आदौ कर्मप्रसङ्गात् कलयति कलुषं मातृकुक्षौ स्थितं मां, विण्मूत्रामेध्यमध्ये कथयति नितरां जाठरो जातवेदाः । यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं, क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो ॥ २ ॥ बाल्ये दुःखातिरेकान्मललुलितवपुः स्तन्यपाने पिपासा, नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मां तुदन्ति । नानारोगादिदुःखादुदरपरवशः शङ्करं न स्मरामि, क्षन्तव्यो मे० ॥ ३ ॥ प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ, दष्टो नष्टो विवेकः सुतधनयुवतिस्वादुसौख्ये निषण्णः । शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वादिरूढं, क्षन्तव्यो मे० ॥ ४ ॥ वार्द्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवाधितापैः, पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनञ्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीनम् । मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं, क्षन्तव्यो मे० ॥ ५ ॥ नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं, श्रौते वार्तो कथं मे द्विजकुलविहिते ब्रह्ममार्गेऽसुरारे । ज्ञातो धर्मो विचारैः श्रवणमंननयोः किं निदिध्यासितव्यं, क्षन्तव्यो मे० ॥ ६ ॥ स्नात्वा प्रत्यूष-काले स्नपनविधिविधौ नाहृतं गाङ्गतोयं, पूजार्थं वा कदाचिद्बहुतरगमना-त्खण्डबिल्वीदलानि । नानीता पद्ममाला सरसि विकसिता गन्धपुष्पै-स्त्वदर्थं, क्षन्तव्यो मे० ॥ ७ ॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैव लिङ्गं, नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः । धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः, क्षन्तव्यो मे० ॥ ८ ॥ ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो, हव्यं ते लक्ष्यसंख्यैर्हुतवह-वदने नार्पितं बीजमन्त्रैः । नो तप्तं गाङ्गतीरे व्रतजपनियमै रुद्रजाप्यैर्न वेदैः, क्षन्तव्यो मे० ॥ ९ ॥ स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्ष्ममार्गे, शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये । लिङ्गज्ञे ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि, क्षन्तव्यो मे० ॥१०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नम्रो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो, नासाग्रे न्यस्तदृष्टि-
र्विदितभवगुणो नैव दृष्टः कदाचित्। उन्मन्याऽवस्थया त्वां विगतकलि-
मलं शङ्करं न स्मरामि, क्षन्तव्यो मे० ॥ ११ ॥ चन्द्रोद्भासितशेखरे स्मर-
हरे गङ्गाधरे शङ्करे, सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे। दन्तित्व-
क्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे, मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यै-
स्तु किं कर्मभिः ॥१२॥ किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं,
किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्। ज्ञात्वैतत्क्षणभङ्गुरं सपदि रे
त्याज्यं मनो दूरतः, स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम्
॥१३॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं, प्रत्यायान्ति गताः
पुनर्न दिवसाः कालो जगद्भक्षकः। लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं
जीवितं, तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाऽधुना ॥१४॥ करचरण-
कृतं वाक्कायजं कर्मजं वा, श्रवणनयनजं वा मानसं वाऽपराधम्। विहित-
मविहितं वा सर्वमेतत्क्षमस्व, जय जय करुणाब्धे श्रीमहादेव शम्भो॥१५॥

इति श्रीमच्छङ्कराचार्यविरचितं शिवापराधक्षमापनस्तोत्रम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीगणेशाय नमः ॥

शिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय ॥ १ ॥
मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमः शिवाय ॥ २ ॥
शिवाय गौरीवदनाब्जवृन्दसूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥ ३ ॥
वसिष्ठकुम्भोद्भवगौतमार्यमुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥ ४ ॥
यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमः शिवाय ॥ ५ ॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ६ ॥

इति श्रीमच्छङ्कराचार्यविरचितं शिवपञ्चाक्षरस्तोत्रं सम्पूर्णम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.